# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – शुक्लयजुर्वेदमाध्यन्दिनसंहिता (१५-१८ अध्यायाः)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या।**

१ अग्ने जातान्प्रणुदा नः सपत्नान्प्रजातान्नुदजातवेदः ।
अधि नो ब्रूहि सुमना अहेडंस्तव स्याम शर्म स्त्रिवरूथ उद्भौ ॥
२ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥
३ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ॥
४ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

**प्रश्नः २** माध्यन्दिनसंहितायाः पञ्चदशाध्यायस्य विषयान् उपस्थापयत ।

**प्रश्नः ३** चितिनिर्माणविधिं यथाशास्त्रं लिखत ।

**प्रश्नः ४** माध्यन्दिनसंहितायाः षोडशाध्यायानुसारं भगवतः रुद्रस्य नामानि लिखत ।

**प्रश्नः ५** महीधरस्य परिचयं लिखत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या।**

१ न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥
२ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

३ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

४ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥

**प्रश्नः ७** माध्यन्दिनसंहितायाः सप्तदशाध्यायानुसारं भगवतः सूर्यस्य विवरणं प्रस्तूयताम् ।

**प्रश्नः ८** माध्यन्दिनसंहितायाः अष्टादशाध्यायस्य विषयाः प्रतिपादनीयाः ।

**प्रश्नः ९** पदपाठस्य महत्त्वं वैशिष्ट्यञ्च सोदाहरणं लिखत ।

**प्रश्नः १०** माध्यन्दिनसंहितायाः षोडशाध्यायस्य यथेच्छं पञ्चमन्त्राणां पदपाठं लिखत ।

प्रश्नः ११ **अधोलिखितेषु केचन दशानां शब्दानामर्थं लिखत ।**

१ अहेडन् ।
२ द्रविणम् ।
३ रायस्पोषेण ।
४ हरिकेशः ।
५ विश्वकर्मा ।
६ गविष्ठिरः ।
७ श्रवः ।
८ वाजस्य ।
९ शर्धम् ।
१० सुश्चन्द्र ।
११ रुद्रः ।
१२ गिरिशन्तः ।
१३ परिभुज ।
१४ शिपिविष्टः ।
१५ मयः ।

****